**Series : 1GEFH** **SET~4**

**प्रश्न-पत्र कोड Q.P. Code 65**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं। | (I) | Please check that this question paper contains **15** printed pages. |
| (II) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें। | (II) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं। | (III) | Please check that this question paper contains **18** questions. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।** | (IV) | **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे। # | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम् (सम्प्रेषणात्मकम्)
# SANSKRIT (Communicative)

*अवधि : होरात्रयम्*
*निर्धारित समय : **3** घण्टे*
*Time allowed : **3** hours*

*पूर्णाङ्काः : 80*
*अधिकतम अंक : **80***
*Maximum Marks : **80***

***General Instructions :***

*This question paper is divided into **four** sections.*

*It has total **18** questions.*

***Section 'A'** : 1 question no. 1.*

***Section 'B'** : 3 questions no. 2 to 4.*

***Section 'C'** : 7 questions no. 5 to 11.*

***Section 'D'** : 7 questions no. 12 to 18.*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*प्रश्नपत्रे **चत्वारः** भागाः सन्ति ।*

*प्रश्नपत्रे समेत्य **(18)** अष्टादशप्रश्नाः सन्ति ।*

***भागः 'क'** – 1 – प्रश्नसंख्या 1.*

***भागः 'ख'** – 3 – प्रश्नसंख्या 2 तः 4 पर्यन्तम् ।*

***भागः 'ग'** – 7 – प्रश्नसंख्या 5 तः 11 पर्यन्तम् ।*

***भागः 'घ'** – 7 – प्रश्नसंख्या 12 तः 18 पर्यन्तम् ।*

*प्रश्नानामुत्तराणि निर्देशानुसारं संस्कृतेन लेखनीयानि ।*

*प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।*

## भागः 'क' ***[10 अङ्काः]***

## अपठितावबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

क्रीडा अस्माकं जीवनस्य एकं महत्त्वपूर्णम् अङ्गम् अस्ति । क्रीडाः विविधाः भवन्ति । छात्रजीवने तु क्रीडाः अनिवार्याः एव भवन्ति । यदा छात्रः क्रीडायाः अभ्यासं करोति तदा तस्य शारीरिकं स्वास्थ्यं मानसिकं स्वास्थ्यं च वर्धते । छात्राः विद्यालये प्रतिदिनं विभिन्नाः क्रीडाः क्रीडन्ति । अस्माकं देशे क्रिकेटः, फुटबॉल, कबड्डी, बॉलीबॉल इत्यादयः लोकप्रियाः क्रीडाः सन्ति । सत्यमेव कथ्यते यत् यः नरः क्रीडासु सक्रियः भवति सः निरन्तरम् आरोग्यं प्राप्नोति । अपरं च क्रीडया नेतृत्वक्षमतायाः संगठितकार्यस्य महत्त्वं च ज्ञायते । प्रतिदिनं क्रीडनं स्वास्थ्याय लाभकरम् एव अस्ति । क्रीडा आत्मसंतोषम् आनन्दं च प्राप्तुम् अपि सहायिका भवति । एवम् एव क्रीडया मानसिक-स्वास्थ्यस्य सामाजिक-सम्बन्धानां च वृद्धिः भवति । अतः अस्माभिः नित्यमेव काऽपि क्रीडा अवश्यमेव क्रीडनीया । नूनं स्वस्थस्य जीवनस्य अनिवार्यम् अङ्गम् अस्ति क्रीडा । सत्यमेव कथ्यते यत् – 'स्वास्थ्यं धनमेव अस्ति' ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(i) स्वस्थस्य जीवनस्य कीदृशम् अङ्गमस्ति क्रीडा ?

(ii) छात्राः कुत्र क्रीडाः क्रीडन्ति ?

(iii) क्रीडासु सक्रियः नरः किं प्राप्नोति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$

(i) सत्यमेव किं कथ्यते ?

(ii) यदा छात्रः क्रीडायाः अभ्यासं करोति तदा किं वर्धते ?

(iii) अस्माकं देशे लोकप्रियाः क्रीडाः काः सन्ति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। $1 \times 1 = 1$

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्) $3 \times 1 = 3$

(i) 'क्रीडन्ति' इति क्रियापदस्य कर्तृपदं किं भवेत् ?

(A) छात्राः
(B) विद्यालये
(C) प्रतिदिनम्
(D) क्रीडायाः

(ii) 'अनिवार्यम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) क्रीडा
(B) अङ्गम्
(C) नूनम्
(D) अस्ति

(iii) 'सः निरन्तरम् आरोग्यं प्राप्नोति।' अत्र किं क्रियापदम् ?

(A) सः
(B) निरन्तरम्
(C) प्राप्नोति
(D) आरोग्यम्

(iv) 'युष्माकम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(A) अनिवार्यम्
(B) आरोग्यम्
(C) आत्मसंतोषम्
(D) अस्माकम्

**भागः 'ख'** *[15 अङ्काः]*

## रचनात्मकं-कार्यम्

**2.** भवान् रहमानः अस्ति दिल्लीनगरे च वसति। स्वनगरे वर्षायाः वर्णनं कुर्वन् स्वमित्रं कृष्णं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत। $10\times\frac{1}{2}=5$

तीर्थवासः

(i) ____________

प्रिय (ii) ____________

सप्रेम नमः !

अत्र कुशलं (iii) ____________। अहम् इदानीं दिल्लीनगरे (iv) ____________ विषये लिखामि। अत्र अस्मिन् वर्षे अत्यधिका वर्षा अभवत्। गतसप्ताहे तु निरन्तरं वर्षा जाता। आकाशे सर्वत्र (v) ____________ एव आसन्। मार्गाः अपि अवरुद्धाः आसन्। मम विद्यालये तु (vi) ____________ अभवत्। अत्र (vii) ____________ जलस्तरः वर्धितः आसीत्। वर्षा तु आनन्ददायिका भवति परम् अतिवृष्टिः (viii) ____________ एव उत्पादयति। तव पत्रोत्तरं प्रतीक्षिष्ये। पितृचरणयोः मम (ix) ____________।


तव मित्रम्

(x) ____________।

**मञ्जूषा**

| |
|---|
| रहमानः, अवकाशः, दिल्लीतः, प्रणामाः, कृष्ण !, समस्याम्, तत्रास्तु, यमुनायाः, मेघाः, वर्षायाः। |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। $5\times1=5$



**मञ्जूषा**

| |
|---|
| वृक्षारोपणं, अध्यापकः, पादपान्, परिसरम्, सिञ्चति, जलपात्रम्, छात्राः, मृत्तिकापात्रम्, पर्यावरणम्, विद्यालये, एकत्रिताः, कुर्वन्ति। |

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत। *5×1=5*

**'मम जननी'**

**मञ्जूषा**

| |
|---|
| परिश्रमम्, स्निह्यति, एकाकी, सर्वदा, प्राक्, उत्तिष्ठति, गृहकार्यम्, एकाकी, भोजनम्, पालयति, पचति, मयि, करोति, आदर्शरूपेण। |

**4.** अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत : $10 \times \frac{1}{2} = 5$

एकः वृक्षः स्व-आत्मकथां (i) ________ । मम जन्मस्थानम् एकं (ii) ________ आसीत्। प्रारम्भे अहं लघुः एव आसम् परन्तु शनैः-शनैः (iii) ________ जातः । मम शाखाः (iv) ________ पत्राणि च मनोहराणि आसन्। अहं श्रान्तानां (v) ________ आश्रयः पक्षिणां निवासः च अस्मि। सर्वे जीवाः प्राणवायुः अत्र एव (vi) ________ । अहं परोपकारी धैर्यवान् च अस्मि। मनुष्याः यदा वृक्षं (vii) ________तदा अहं जीवनस्य सुखम् अनुभवामि। अहं जनेभ्यः अभीष्टानि (viii) ________ यच्छामि । मम जीवनं तु (ix) ________ एव अस्ति । परं लोभवशात् मनुष्यः वृक्षं छित्वा (x) ________ एव करोति। वृक्षाणां संरक्षणमेव जीवनम् अस्ति।

**मञ्जूषा**

| |
|---|
| आत्महानिम्, पथिकानां, पोषयन्ति, कथयति, हरिताः, वनम्, उन्नतः वस्तूनि, अन्येभ्यः, प्राप्नुवन्ति। |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : *5×1=5*

*छात्रः* – महोदय ! नमो नमः।

*अध्यापकः* – (i) ____________ ।

*छात्रः* – श्रीमन् अहं गृहं गन्तुम् इच्छामि।

*अध्यापकः* – काचित् समस्या अस्ति ? (ii) ____________ ।

*छात्रः* – अहं समये कार्यं कर्तुम् अशक्तः यतः अहं रुग्णः अस्मि।

*अध्यापकः* – रुग्णः असि ? (iii) ____________ ।

*छात्रः* – यदि अहं गृहं गच्छेयं तर्हि कार्यहानिः भवेत्।

*अध्यापकः* – अहं जानामि परं (iv) ____________ ।

*छात्रः* – धन्यवादः। अहं श्वः कार्यं कृत्वा अवश्यं तस्य निरीक्षणं कारयिष्यामि।

*अध्यापकः* – शुभकामनाः। (v) ____________ ।

**मञ्जूषा**

- शीघ्रमेव स्वस्थो भव।
- शुभप्रभातम्। किं सर्वं कुशलम् ?
- यथाशीघ्रं गृहं गच्छ।
- तव कार्यमपि अपूर्णमस्ति।
- त्वं स्वास्थ्यस्य महत्त्वम् अपि अवबोधय।

## भागः 'ग'

*[25 अङ्काः]*

### अनुप्रयुक्त-व्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) प्रियच्छात्राः । अभिनन्दनं भवताम् ।

(ii) इति + एतद् विदुषां वचः ।

(iii) दुष्टबुद्धिस्तु तयोः वार्तां श्रुत्वा गतः ।

(iv) पितुः + उपदेशेन असन्तुष्टः सः आगच्छत् ।

(v) अदीयमानं निधन + एकनिष्ठम् ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) येन मम लोकयात्रा निर्बाधा भवेत् ।

(A) लोके यात्रा (B) लोकं यात्रा

(C) लोकः च यात्रा च (D) लोकस्य यात्रा

(ii) न पूर्वः अयं कोशः तव भारति !

(A) अनपूर्वः (B) अपूर्वः

(C) पूर्वन (D) अनपूर्वन्

(iii) बकः च काकः च कलहं कुरुतः ।

(A) बककाकयोः (B) बककाकः

(C) बककाकौ (D) बककाके

(iv) विषादेन सहितम् यूथपतिः अवदत् ।

(A) विषादसहितम् (B) सहितविषादम्

(C) सविषादम् (D) सहविषादम्

(v) कृष्णार्जुनौ परस्परं वदतः ।

(A) कृष्णः च अर्जुनः च (B) कृष्णस्य अर्जुनः

(C) कृष्णौ च अर्जुनौ च (D) कृष्णेन च अर्जुनः च

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) भवतः दिव्यां शक्तिं जानीमः।

(A) दिव्य + तल्

(B) दिव्य + ङीप्

(C) दिव्य + टाप्

(D) दिव्य + त्व

(ii) सा बुद्धि + मतुप् अवदत्।

(A) बुद्धिमत्

(B) बुद्धिमान्

(C) बुद्धिमानी

(D) बुद्धिमती

(iii) समता वाचि चित्ते च अवक्रता एव कथ्यते।

(A) सम + ता

(B) सम + तल्

(C) समत + टाप्

(D) सम + त्व

(iv) एतत् अरुणाचलस्य वर्ष + ठक् पर्व अस्ति।

(A) वार्षिकम्

(B) वर्षस्य

(C) वर्षा

(D) वर्षणम्

(v) कीदृशी तव मैत्री।

(A) कीदृश + ङीप्

(B) कीदृश + टाप्

(C) कीदृश + तल्

(D) कीदृश + मतुप्

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत :
(केवलं प्रश्नत्रयम्) *3×1=3*

*दिव्या* – (i) ____________ किं खादसि ?

*तारा* – मया फलम् एव (ii) ____________ ।

*दिव्या* – शोभनम्, कि त्वया दुग्धम् अपि पीयते ?

*तारा* – आम्, अहं (iii) ____________ अपि पिबामि ।

*दिव्या* – मया तु रात्रौ भोजनं न क्रियते ।

*तारा* – अहम् अपि रात्रौ (iv) ____________ न खादामि ।

**मञ्जूषा**

| |
|---|
| दुग्धम्, अन्नम्, त्वम्, खाद्यते । |

**9.** कालबोधकशब्दैः अधोलिखित-कार्यक्रमं पूरयत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) बालिका __________ 4:00 वादने गायति ।

(ii) तदा __________ 6:30 वादने सा नृत्यति ।

(iii) __________ 8:15 वादने सा भोजनं करोति ।

(iv) बालिका __________ 9:45 वादने शयनं करोति ।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) धैर्यं लयसमर्थं __________ षडेते पाठका गुणाः ।

(ii) अग्निः __________ दहति माम् अयं शोकः ।

(iii) यदि अहं तव सन्ततिं न पालयामि __________ कुत्र स्युः पिकाः ।

(iv) __________ उक्त्वा सः अन्तर्हितः अभवत् ।

(v) __________ ईदृशं दानम् इच्छन् याचकः प्रेरितः स्यात् ।

**मञ्जूषा**

| |
|---|
| इति, तर्हि, नूनम्, इव, च । |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय विकल्पेभ्य: उचितपदं चित्वा वाक्यानि पुनः लिखत :
(केवलं प्रश्नत्रयम्) *3×1=3*

(i) भवन्तः अस्य प्रदेशस्य विषये ज्ञातुम् उत्सुकः।

(A) उत्सुका

(B) उत्सुकौ

(C) उत्सुकाः

(D) उत्सुकस्य

(ii) यः आत्मनः श्रेयम् इच्छति।

(A) श्रेयमम्

(B) श्रेयः

(C) श्रेय

(D) श्रेयाः

(iii) एतत् कलहः भवतां विनाशकारणं भविष्यति।

(A) एषा

(B) एषः

(C) अस्य

(D) अस्मिन्

(iv) मुग्धा ! अहं तु अतीव कर्तव्यपरायणः।

(A) मुग्धः !

(B) मुग्धाः !

(C) मुग्ध !

(D) मुग्धे !

भागः 'घ' [30 अङ्काः]

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः। दग्धां हयशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत् – 'हा ! दग्धाः मे घोटकाः कथं रक्षणीयाः ? सपदि उपायः क्रियताम्।'

'यथोचितं क्रियताम्' इति राजादेशं श्रुत्वा सर्वे भयत्रस्ताः कपयः अचिन्तयन् – 'हा ! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) के प्राणत्राणाय इतस्ततः अधावन् ?

(ख) राजादेशं श्रुत्वा कीदृशाः कपयः अचिन्तयन् ?

(ग) शालिहोत्रज्ञान् वैद्यान् आहूय कः अपृच्छत् ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) यदा अश्वाः प्राणत्राणाय अधावन् तदा किम् अभवत् ?

(ख) कपयः किम् अचिन्तयन् ?

(ग) राजा किमर्थं वैद्यान् आहूय अपृच्छत् ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'अश्वाः' इति कर्तृपदस्य क्रियापदं किम् ?

(ख) 'हयशालां' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?

(ग) 'वानराः' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

**13.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कोशः कीदृशः अस्ति ?

(ख) कोशस्य क्षयः कस्मात् भवति ?

(ग) सरस्वत्याः कः अपूर्वः अस्ति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) कस्याः कोशः अपूर्व विद्यते ?

(ख) कोशः कदा वृद्धिम् आयाति ?

(ग) भारत्याः कोशः कथम् अपूर्वः अस्ति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'कोशः' इति कर्तृपदस्य क्रियापदं किम् ?

(ख) 'अयम्' इति पदस्य विशेष्यपदं किमस्ति ?

(ग) 'निधिः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

*मयूरः* – (प्रविश्य साट्टहासम्) सत्यं सत्यम् । अहमेव राष्ट्रपक्षी । को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् अधिगृह्य क्रूरतया भक्षयसि । धिक् त्वाम् ! अवमानितं खलु सर्वं पक्षिकुलं त्वया ।

*काकः* – रे सर्पभक्षक ! नर्तनात् अन्यत् किम् अपरं जानासि ?

*मयूरः* – श्रूयतां श्रूयताम् । मम नृत्यं तु प्रकृतेः आराधना । पश्य ! चारुवर्तुलचन्द्रिका-शोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम् । मम केकारवं श्रुत्वा कोकिलः अपि लज्जते । मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः ।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) बकः मौनं धृत्वा कान् भक्षयति ?

(ख) केन मयूरः पक्षिराजः कृतः ?

(ग) कस्य नृत्यं तु प्रकृतेः आराधना ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) सर्पभक्षकः कः अस्ति ?

(ख) कोकिलः कस्य केकारवं श्रुत्वा लज्जते ?

(ग) मयूरस्य कीदृशानाम् पिच्छानाम् अपूर्वं सौन्दर्यमस्ति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'पक्षाणाम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(ख) 'लज्जते' इति क्रियापदस्य कर्तृपदं किम् ?

(ग) 'वराकान्' इत्यस्य विशेष्यपदं चित्वा लिखत।

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं पञ्चप्रश्नाः) $5\times1=5$

(i) मनः अभ्यासेन गृह्यते।

(ii) भगवते नमः।

(iii) सः पुनः मित्रस्य गृहं समागतः।

(iv) पिता बाल्ये विद्याधनं यच्छति।

(v) देवानाम् अपि देवः 'मोपीन' इति कथ्यते।

(vi) मेष: दाहवेदनया भूमौ लुठति।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

**अन्वयः**

(i) ___________ सम्मोहः भवति, सम्मोहात् (ii) ___________ (भवति), स्मृतिभ्रंशात्

(iii) _____________ (भवति) (iv) __________ प्रणश्यति।

**मञ्जूषा**

| |
|---|
| क्रोधात्, बुद्धिनाशात्, स्मृतिविभ्रमः, बुद्धिनाशः। |

**अथवा**

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थं पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः ।
स केनापि प्रकारेण परैर्न परिभूयते ॥

**भावार्थ :**

यः (i) __________ (परामर्शदाता) सम्भाषणे (ii) ___________ भवति । यः धैर्यवान् च भवति, यः च (iii) ____________ अपि निर्भयः एव तिष्ठति; सः अन्यैः कदापि न (iv) ___________ ।

**मञ्जूषा**

| |
|---|
| तिरस्क्रियते, कुशलः, मन्त्री, परिषदि । |

**17.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) $4\times1=4$

(i) शारदा <u>अम्भोज</u>-वदना ।

(A) कमलम् (B) मुखम्
(C) सरस्वती (D) वाचिकम्

(ii) विचित्रा खलु <u>दैवगतिः</u> ।

(A) देवरूपम् (B) देवी
(C) भाग्यविलासः (D) गतियन्त्रम्

(iii) जनाः परस्परम् <u>शालिचूर्णं</u> लिम्पन्ति ।

(A) अक्षतचूर्णम् (B) पर्वतचूर्णम्
(C) पाषाणम् (D) शिल्पम्

(iv) <u>शैलाः</u> विदीर्यन्ते ।

(A) पवनः (B) सूर्यः
(C) अग्निः (D) पर्वताः

(v) शक्नोतीहैव यः सोढुं <u>प्राक्</u> शरीरविमोक्षणात्।

(A) पूर्वदिशायाम् (B) प्रथमम्

(C) पूर्वम् (D) प्राचीनम्

**18.** अधोलिखितां कथां मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत : $8\times\frac{1}{2}=4$

एकदा स्वपुण्यानां फलैः बोधिसत्वः शिवीनां राजा अभवत्। सः अतिविनम्रः (i) __________ च आसीत्। प्रजाकल्याणार्थं सः सर्वत्र (ii) __________ निर्माणम् अकरोत्। एतासु दानशालासु (iii) __________ आगत्य अभीष्टानि वस्तूनि लभन्ते स्म। (iv) __________ राजा दानशालासु विचरन् सन्तुष्टानाम् (v) __________ विरलसंख्यां दृष्ट्वा दुःखी अभवत्। राजा स्वशरीरस्य दानं कर्तुं (vi) __________ अकरोत्। एतत् ज्ञात्वा सर्वे एव (vii) __________ सञ्जाताः। तस्य दानशीलतां परीक्षितुम् (viii) __________ तत्र आगच्छत्।

**मञ्जूषा**

| |
|---|
| व्याकुलाः, बुद्धिमान्, निश्चयम्, इन्द्रः, अर्थिनः, दानशालानाम्, एकदा, याचकानां। |